International Journal of Sanskrit Research 2020; 6(5): 138-140

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(5): 138-140
© 2020 IJSR
www.anantaajournal.com
Received: 07-07-2020
Accepted: 09-08-2020

**विजेता**
शोधच्छात्रा, राष्ट्रीय-संस्कृत-संस्थान,
वेदव्यास परिसर, बलाहर,
हिमाचल प्रदेश, भारत

**Corresponding Author:**
**विजेता**
शोधच्छात्रा, राष्ट्रीय-संस्कृत-संस्थान,
वेदव्यास परिसर, बलाहर,
हिमाचल प्रदेश, भारत

# शास्त्रकाव्यानुगुणं भिषक्कक्रचित्तोत्सवस्य स्वरूपम्

## विजेता

**प्रस्तावना**

मनुष्यजीवनस्योद्देश्यं चतुर्वर्गावाप्ति: वर्त्तते। यस्य वेदशास्त्राणि वेदाङ्गभूतानि दर्शनादीनि मुख्यसाधनत्वेन अङ्गीक्रियन्ते। वेदादिशास्त्राणि ईश्वरप्रोक्तत्वात्, ऋषिभि: प्रोक्तत्वात् सुकोमलमतय: मनुष्या: काठिन्येन अवगम्यन्ते तथा च तेजपुंजभूता: ऋषय: एव शुद्धान्त:करणेन अवगन्तुं शक्नुवन्ति। परं ये अल्पसामर्थ्यवन्त: मानवा: सन्ति ते चतुर्वर्गफलप्राप्त्यर्थं सरलभावावगमे सुकरत्वेन काव्यमेव प्रमुखत्वेनाङ्गीक्रियते। काव्यं नाम खलु वैदुष्यनिस्यन्दभूतं किमपि लोकोत्तरं कविकर्म चतुर्वर्गसाधने अतिशायितया समुल्लसति जगति। संस्कृतवाङ्मयं सर्वानन्दप्रदाने सर्वेषां चित्तरंजने रमणीयत्वेन हृदयाह्लादकत्त्वेन सुशोभते। तत्रापि शास्त्रव्युत्पत्तिमभिलक्ष्य विरचितं काव्यं तु वैदुष्यनिकषभूतं नूनं किमपि चमत्कृतिकरं महत्त्वातिशयमादधाति। उक्तं च साहित्यदर्पणेऽपि-

**चतुर्वर्गफलप्राप्ति: सुखादल्पधियाम[1]।।**

भरतमुनिनाऽपि स्वीय नाट्यशास्त्रे निदर्शितं यत् कष्टार्त्तानां परं सुखसादकं काव्यं वर्त्तते। रुद्रटभामहादिभिरपि काव्यस्योपादेयतां स्वीकृतम्। मम्मटेन काव्यप्रकाशेऽपि-

**काव्यं सशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।**
**सद्य: परनिर्वृतये कान्तासम्मिततयोपदेशयुजे[2]।।**

न एतावदेव काव्यशास्त्राचार्या: काव्यस्य माहात्म्यं स्वीकुर्वन्ति प्रत्युत-

**यदेतद्वाङ्मयं विश्वमर्थमूर्त्या विवर्त्तते।**
**सोऽस्मि काव्यपुमानम्ब पादौ वन्देय तावकौ[3]।।**

कवे: कर्म काव्यमित्यभिधीयते। वैदिककालादेव काव्यपरम्परा प्रवर्त्तते। वेदेषु जगन्नियन्ता कविशब्देन प्रशंसित:- 'कविर्मनीषी परिभू: स्वयम्भू:[4] 'तथा च 'पश्य देवस्य काव्यं न ममार न जीर्यति'[5] इति। काव्यशब्द: 'गुणवचनब्राह्मणादिभ्य: कर्मणि च'[6] इति सूत्रेण कविशब्दात् काव्यं निष्पन्नम्। काव्यलक्षणान् वर्णयन् अनेकै: आचार्यै: स्वीय काव्यशास्त्रेषु प्रसङ्गानुसारेण आत्मनोभिप्रायं प्रदर्शितम्। काव्यप्रकाशे मम्मट: काव्यस्वरूपं निर्देशयन्नाह-

**'तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुन: क्वापि'[7]।।**

मम्मट: शब्दार्थयो: समष्टिमेव काव्यं मनुते। शब्दार्थौ समुदितौ एव काव्यं न तु विभेदेन यत: 'शब्दार्थौ काव्यमिति'। तदिति सर्वनामपदेन 'काव्यं यशसेऽर्थकृते०'[8] इत्यत्र प्रयुक्तस्य काव्यपदस्य ग्रहणं भवति।
ते काव्यप्रयुक्तौ 'शब्दार्थौ' कथं भवितव्यौ विषयेऽस्मिन् त्रीणि विशेषणानि प्रस्तौति यत् ते- 'अदोषौ', सगुणौ', 'अनलङ्कृती पुन: क्वापि' अर्थात् शब्दार्थो दोषरहितौ भवितव्यौ। शब्दार्थौ 'सगुणौ' माधुर्यादि काव्यगुणै: युक्तौ भवितव्यौ तथा च साधारणत: ते सालङ्कारौ भवितव्यौ। क्वापि अर्थात् सर्वत्र सालङ्कारौ क्वचित्तु स्फुटालङ्कारविरहेऽपि न काव्यत्वहानि: स्यात्। इत्थं एतै: त्रिभि: विशेषणै: संयुक्तं शब्दार्थयो: समष्टे: नाम काव्यमिति स्वीकरोति।
मम्मटस्य पूर्ववर्त्याचार्यभामाहस्य काव्यलक्षणं सर्वाधिकं प्राचीनमस्ति। तन्मतेन –

**'शब्दार्थौ सहितौ काव्यं गद्यं पद्यं च तद् द्विधा'।।**

भामहानन्तरं 'काव्यादर्शस्य निर्मात्रा दण्डिन: मतम्-

**'अत: प्रजानां व्युत्पत्तिमभिसन्धाय सूरय:।**
**वाचां विचित्रमार्गाणां निबबन्धु: क्रियाविधिम्[10]।।**

पूर्वाचार्यान् स्मरन् आचार्य: काव्यलक्षणमित्थं प्रस्तौति-

**तै: शरीरं काव्यानामलङ्काराश्च दर्शिता:।**
**'शरीरं तावदिष्टार्थ व्यवच्छिन्ना पदावली'[11]।।**

तदनु कालक्रमे वामनस्य काव्यलक्षणं काव्यं निरूपयति। वामनाचार्य: दण्डीभामाहमतिक्रम्य तिष्ठति। पूर्वाचार्यै: रचितकाव्यशरीरं स: अनुप्राणयति। वामन: बाह्यसंरचनां विहाय काव्यस्य आत्मानमन्वेषयति स: 'रीतिरात्मा काव्यस्य' तथा च 'तद्ग्राह्यमलङ्करात्', सौन्दर्यमलङ्करम् इति वर्णयन् काव्ये सौन्दर्याधायकालङ्कारान् ग्राह्योपादेयतारूपेण वर्णयति।
आनन्दवर्धनाचार्यस्य मते ध्वनिरेव काव्यस्य जीवनाधायकं तत्त्वमस्ति। ध्वनिं विना सुष्ठु शब्द: अर्थं च निर्जीवदेहवत् त्याज्यमस्ति। यथा-

**काव्यस्यात्मा ध्वनिरिति बुधै:य: समाम्नातपूर्व-**
**स्तस्याभावं जगदुरपरे भाक्तमाहुस्तमन्ये।**
**केचिद्वाचां स्थितमविषये तत्त्वमूचुस्तदीयं**
**तेन ब्रूम: सहृदयमन: प्रीतये तत्स्वरूपम्[12]।।**

क्रमेऽस्मिन् वक्रोक्तिजीवितकारकुन्तक: काव्यलक्षणमित्थं दर्शयति-

**शब्दार्थौ सहितौ वक्र- कविव्यापारशालिनि।**
**बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणि [13]।।**

साहित्यशास्त्रस्य इतिहासे यथा वामन: 'रीति-सिद्धान्तवर्णने', आनन्दवर्धनाचार्य: 'ध्वनिसिद्धान्तवर्णने तथा च कुन्तक: 'वक्रोक्ति -सिद्धान्तवर्णने सिद्धहस्ता: कवीश्वरा: तथैव क्षेमेन्द्रोऽपि औचित्यसिद्धान्तवर्णने दक्षा:। ते औचित्यमेव काव्यस्य 'जीवितम्' मन्यते। स्वौचित्यविचारचर्चाप्रसङ्गे लिखति –

**काव्यस्यालमलङ्कारै: किं मिथ्यागणितैगुणै:।**
**यस्य जीवितमौचित्यं विचिन्त्यापि न दृश्यते।।**
**अलङ्कारास्त्वलङ्कारा: गुणा एव गुणा: सदा।**
**औचित्यं रससिद्धस्य स्थिरं काव्यस्य जीवितम्[14]।।**

साहित्यदर्पणकारविश्वनाथ: रसात्मकवाक्यमेव काव्यं मन्यते। 'वाक्यं रसात्मकं काव्यम्' इति। इत्थं बहुविधनिरूपितं काव्यं यदा सर्वसिद्धान्तान् अनुसरन् अग्रेसरति तदा तत् काव्यं सहृदयानां हृदयाह्लादप्रदं भवति। काव्यमालम्बयन् सरसशैल्या शास्त्रीयतत्त्वेषु निहितत्त्वान् सर्वग्राह्यादायककरणपरम्परा आवैदिककालादेव प्रचलति।
काव्यमाध्यमेन सरसतया शास्त्रीतत्त्वानां प्रस्तुतीकरणस्य परम्परा संस्कृतवा+मयस्य सुविख्यात परम्परा विद्यते। वस्तुत: काव्यस्य सद्य: परनिर्वृतिसाधकता कान्तासम्मिततयोपदेशप्रदातृत्वश्च शास्त्रविदां ध्यानमपि प्राकर्षत् तथा चेत्थं दु:श्रवं, दुर्भणं दुरधिगमत्वादिदोषदुष्टं शास्त्रसन्दर्भं काव्यस्य संजीवनी अधिगता, यस्य परिणामरूपेण काव्यस्य एका अन्या विधा प्रादुर्भूता। या शास्त्रकाव्यपरम्परा, काव्यशास्त्रपरम्परा अथवा व्याकरणोदाहरणकाव्यपरम्परा इत्यभिधीयते।
परम्परायामस्यां कैश्चिद् कविभि: कथा व्याजेन सरसकविताद्वारा कोपि विशिष्ट: शास्त्रीयविषय: प्रस्तुत:। अस्या: कविपरम्पराया: सर्व प्रथमोल्लेख: काव्यामीमांसायां प्राप्नोति, यत्र आचार्यो राजशेखर: शास्त्रकवीनां लक्षणं कुर्वन् अभिदधाति-

**तत्र त्रिधा शास्त्रकवि:। य: शास्त्रं विधत्ते, यश्च काव्यं संविधत्ते, योऽपि काव्ये शास्त्रार्थं निधत्ते[15]।।**

परिभाषेयं स्पष्टयति यत् यदा शास्त्राकवि: काव्ये शास्त्रार्थं निधत्ते तदा तत 'काव्यशास्त्रम्' इत्युच्यते। काव्यशास्त्रेण हि सरसतया विनोदरूपेणैव शास्त्रज्ञानं लभ्यते। परन्तुभोज: श्रृङ्गारप्रकाशे तमेव काव्यं 'काव्यशास्त्रम्' वदति-

**यत्रार्थ: शास्त्राणां काव्ये विनिद्यते महाकविभि:।**
**तद्भट्टिकाव्यमुद्राराक्षसवत् काव्यशास्त्रं स्यात्[16]।।**

परम् अग्रेऽआचार्यक्षेमेन्द्रेन सुवृत्ततिलके शास्त्राधारितकाव्यानां भेदद्वयं प्रदर्शितम्। स: व्याकरणोदाहरणपुरस्सरां काव्यरचनां 'काव्यशास्त्रम्' तथा च चर्तुवर्गोपदेशकृताम् अवशिष्टां काव्यरचनां 'शास्त्रकाव्यम्' इत्याचक्षते। शास्त्रीयानि तत्त्वानि यत्र काव्यशैल्या आरच्यन्ते तत् शास्त्रकाव्यमिति उच्यते। प्राचीने काले शास्त्राणां काव्यशैल्या लेखनस्य परम्परा आसीत्। यतो हि कठिनानि शास्त्रीयानि तत्वानि समधुर काव्यशैल्या विरच्य विनेया उन्मुखी क्रियन्ते स्म।

**शास्त्रं काव्यं शास्त्रकाव्यं काव्यशास्त्रं च भेदत:।**
**चतुष्प्रकार: प्रसर: सतां सारस्वतो मत:।।**
**शास्त्रं काव्यविद: प्राहु: सर्वकाव्याङ्गलक्षणम्**
**काव्यं विशिष्टशब्दार्थसाहित्यसदलङ्कृति:।।**
**शास्त्रकाव्यं चतुर्वर्गप्रायं सर्वोपदेशकृत्।**
**भट्टिभौमककाव्यादि काव्यशास्त्रं प्रचक्षते।।[17]**

**भिषक्कक्रचित्तोत्सवस्य स्वरूपं**

संसारेऽस्मिन् इतरदेशेभ्य: पूर्वमेव भारतवर्षे चिकित्साशास्त्रमासीत् इति इतिहासविदां मतम्। वेदेष्वपि बहवश्चिकित्साशास्त्रविषया: समुपलभ्यन्ते। आप्तैर्महर्षिभि: कायचिकित्सा-शल्य-शालक्य-कौमारभृत्यागदतन्त्र-भूतविद्या-रसायन-वाजीकरणाख्यैरष्टभि: प्रधानाङ्गै: प्रविभज्यायुर्वेदे बहूनि तन्त्राणि विरचितान्यासन्।
ऋगादयश्चत्वारो वेदा: प्रायेण परलोकहितकरा: परमायुर्वेदस्तु उभयलोकहितकर:। आयुर्वेदस्य परमं प्रयोजनं स्वस्थस्य स्वास्थ्यरक्षा आतुरस्य विकारप्रशमनं चेति प्रसिद्धमस्ति। सुश्रुतसंहितायामपि इदमेव प्रयोजनं प्रतिपादितम्-

**इह खल्वायुर्वेदप्रयोजनं व्याध्युपसृष्टानां व्याधिपरिमोक्ष:, स्वस्थस्य रक्षणं च[18]।।**

उद्देश्यमिमं पूरयितुं मुख्यत्वेन सूत्रत्रयं वर्त्तते- १. हेतुज्ञानम् २. लिङ्गज्ञानम् ३. औषधज्ञानम्। इमानि सूत्राण्यवलम्ब्येव प्राचीनकालात् चिकित्साशास्त्रमनुवर्त्तते। अष्टाङ्गायुर्वेदस्य प्रत्यङ्गरूपेण निदान-चिकित्सा-द्रव्यगुण-भैषज्यकल्पना-रसशास्त्रादि विषया: प्रवर्त्तिता: वस्तुतत्त्वं तु इदमस्ति रोगोपचारार्थं त्रयाणामपि प्रधानसूत्राणां ज्ञानं परमावश्यकम्। एतेषां तत्त्वत्रयाणां ज्ञानाभावे चिकित्सकस्यास्तित्वं तथैव वर्त्तते यथा त्रिगुणप्रकृति: अर्थात् सत्त्व-रजस्-तमसां साम्यावस्था या प्रकृतिरस्ति सा यथा त्रिगुणाभावे भवेत्।
रोगाणां ये कारणानि भवन्ति ते निदानशब्देनोच्यन्ते। यतो हि अस्य ज्ञानान्तरमेव रोगाणां लि ङ्गज्ञानेनैव चिकित्सा प्रवर्तते। सा चिकित्सा पथ्यौषध्यादि माध्यमेन सम्भवति। तदर्थमेव आयुर्वेदशास्त्रं त्रिसूत्रशास्त्रमिति प्रोच्यते।

**हेतुलिङ्गौषधज्ञानं स्वस्थातुरपरायणम्।**
**त्रिसूत्रं शाश्वतं पुण्यं बुबुधे यं पितामह:[19] ।।**

सूत्रत्रयाधारभूतमायुर्वेदशास्त्रं त्रिस्कन्धशास्त्रमपि कथ्यते।

**सोऽनन्तपारं त्रिस्कन्धमायुर्वेदं महामति:।**
**यथावदचिरात् सर्वं बुबुधे तन्मना मुनि:[20] ।।**

यथा वृक्षस्य स्कन्ध: सर्वमपि सहते अर्थात् सर्वाधारत्वेन तिष्ठति तथैव आयुर्वेदवृक्षोऽपि स्कन्धत्रयेष्वेव अवस्थितो भवति।
निदानशास्त्रेषु हेतुवर्णनं तथा च लिङ्गवर्णनं सहैव भवति। अस्मात् कारणादेव निदानशास्त्राणां प्रथमं स्थानं भवति। अनेन विना न चिकित्सा प्रारभते तस्मात् आयुर्वेदे निदानं महत्वपूर्णं स्थानं भजते। आयुर्वेदीयपरम्परायां चरकसुश्रुताष्टाङ्गहृदयादिषु निदानविषयोऽयं वर्णित:। तत्र तत्र संहितासु निदानस्थानरूपेण विषयोऽयमुपस्थापित:। विस्तृतविषययुतां संहितानामध्ययनमल्पसामर्थ्यवतामध्येतृणां कृते दुष्करं भवतीति मनसि विचारणां कृत्वा परिवर्तिभि: कारुणिकै: आचार्यै: संक्षिप्तरूपेण निदानशास्त्राणि विरचितानि। तत्र सप्तम्यां शताब्द्यां माधवकरविरचितं माधवनिदानं परमं प्रसिद्धमस्ति। वैद्यसमाजे तस्य पठनपाठनपरम्परा बहुल्येन प्रचलिता जाता।

माधवनिदाने तथा च तस्या: प्रचलिता: या मुधकोशटीका वर्त्तते तस्यां प्राचीनसंहितानां निदान-विषयकं ज्ञानं समाहितमस्ति। तद्यथा-

**शारीरे सुश्रुत: प्रोक्तश्चरकस्तु चिकित्सिते।**
**निदाने माधव: श्रेष्ठ: सूत्रस्थाने तु वाग्भट:।।**

अर्थात् शारीरविषये सुश्रुत: चिकित्सायां चकर:, सूत्रस्थाने वाग्भट: तथा च निदाने माधवो श्रेष्ठ: इति प्रसिद्धिरस्ति।
भिषक्चक्रचित्तोत्सवकारेण श्री हंसराजेन चरकसुश्रुताष्टाङ्गहृदयादि पूर्ववर्ती संहितानां तथा च माधवनिदानादि निदानशास्त्राणां सूक्ष्मेक्षिकयावलोकनं कृत्वैव अस्य रचना कृता इति प्रतिभाति।
निदानपरम्परामनुसरन्नैव सरलसुललितशैल्यां कविना वैद्यकग्रन्थोऽयं विरचित इति ज्ञायते।
कविवरेण श्री हंसराजेन प्राचीनवैद्यपरम्परामनुसन् निदानविषयकं शास्त्रमिदं साररूपेण प्रस्तुतम्। ग्रन्थनाम्नैव ज्ञायते यत् ग्रन्थोऽयं वैद्यवृन्देषु आनन्ददायक इति। ग्रन्थस्य स्वरूपावेक्षणादपि अन्वर्थसंज्ञेयमिति प्रतिभाति।
ग्रन्थारम्भे ग्रन्थकार: अस्यापरसंज्ञा 'हंसराजनिदानम्' इत्यपि प्रस्तौति। तद्यथा-

**भिषक्चक्रचित्तोत्सवं जाड्यनाशं करिष्याम्यहं बालबोधाय शास्त्रम्।**
**नमस्कृत्य धन्वन्तरिं वैद्यराजं जगद्रोगविध्वंसनं स्वेन नाम्ना[21]।।**

अर्थात् सर्वादौ वैद्यराजं धन्वन्तरिं नमस्कृत्य बालबोधार्थं अर्थात् अल्पसामर्थ्यवतामवबोधनार्थं तथा च वैद्यवृन्दानां हृदयाह्लादकं, धी-जाड्यापकारकम्, जगद्रोगनाशकं 'हंसराजनिदानम्' रचयामि इति। ग्रन्थस्यास्य कलेवरं नाति विस्तृतं नापि स्वल्पम् अस्मात् कारणादपि विशेषेणोपादेयो वर्त्तते। सुललितपद्यमयत्वात् तथा शोभनालङ्कारभूषितत्वात् रचनेयं सहृदयानां हृदयमावर्जयति। ग्रन्थारम्भे स्वयं वैद्यराजेनाप्युक्तम्-

**आत्रेयधन्वन्तरिसुश्रुतानां नासत्यहारीतकमाधवानाम्।**
**सुषेणदामोदरवाग्भटानां दस्त्रस्वयम्भूचरकादिकानाम्[22]।।**
**एषां समालोक्य मतं मुहुर्मुहुर्ग्रन्थो मनोज्ञ: क्रियते मयाऽधुना**
**पद्यैरदोषै रचितोऽल्पमेधसां ज्ञानाय नूनं भिषजात्ममानिनाम्[23]।।**

कविवरस्य हंसराजस्योद्देश्यं निदानविषयं सरसशैल्यामुपस्थापनम्। विषयेऽस्मिन् कविवरेण साफल्यमधिगतम्। श्लोकानां गुम्फने वैद्यराजेन शार्दूलविक्रीडित-स्रग्धरा-शिखरिणी-मन्दाक्रान्ता-मालिनी-वसन्ततिलकादीनि बृहच्छन्दांसि प्रयुक्तानि। काव्येऽस्मिन् बहुश: अनुष्टुप्-भुजङ्गप्रयात-पंचचामर-द्रुतविलम्बित-शालिनी-विद्युन्माला-तोटकादीनि मंजुलस्वरयुक्तानि छन्दांस्यपि अतीव सहजतया प्रातिपादितानि।
बाह्यसंरचनायां यथा छन्देभि: सुसज्जितं सममेव उत्तमालङ्कारैरपि कृतिरियमलङ्कृता। उपमारूपकाद्यलङ्कारै: अलङ्कृतोऽयं ग्रन्थ: समलङ्कृता कान्तेव सुशोभते। कविवरेणात्र मङ्गलाचरणे एव छन्दोलङ्कारयुत: प्रयोग: प्रस्तुत:। श्लोकेऽस्मिन् उममारूपकालङ्कारौ स्रग्धरा छन्दश्च-

**ध्यायेद् बालाम्रभाते विकुसितवदनाम्फुल्लराजीवनेत्रां**
**मुक्तावैदूर्यगर्भै रुचिरकनकजैर्भूषणैर्भषिताङ्गीम्।**
**विद्युत्कोटिच्छटाभां परिमलबहुलां दिव्यसिंहासनस्थां**
**गीर्दैवीतस्य दासी भवति सुरवनं नन्दनं केलिगेहम्[24]।।**

ग्रन्थारम्भे वैद्यराजेनौक्तं यत् रचनेयं पूर्ववर्तिनां चिकित्सापारङ्गतानामाचार्याणां परम्परामनुसरन्नैव रचिता इति। ग्रन्थेऽस्मिन् अनेके विषया: सुव्यवस्थितरूपेण समुपस्थापिता:-
अत्र सर्वप्रथमं मङ्गलाचरणं तत: नाडी परीक्षा, दोषप्रकोप हेतव: ज्वरलक्षणानि, अतीसारलक्षणानि, संग्रहणीनिदानलक्षणानि, अर्शांसि लक्षणानि, भगंदरम्, अजीर्णलक्षणानि, कृमिलक्षणानि, पाण्डुरोगलक्षणानि, कामलादिलक्षणम् रक्तपित्तम्, राजयक्ष्मणोलक्षणानि, कासलक्षणानि, हिक्कालक्षणानि, श्वासलक्षणानि, स्वरभेदलक्षणानि, अरोचकलक्षणानि, छर्दिलक्षणानि, तृष्णालक्षणानि, मूर्छालक्षणम् दाहलक्षणानि, मदात्ययलक्षणानि, उन्मादलक्षणानि, भूतोन्मादलक्षणानि, अपस्मारलक्षणानि, वातव्याधिलणानि, वातरक्तलक्षणानि, उरुस्तम्भनिदानम्, आमवातलक्षणानि, शूलपरिणामशूललक्षणानि, अनाहोदावर्त्तलक्षणानि, गुल्मलक्षणानि, हृद्रोगलक्षणानि, मूत्रकृच्छ्रलक्षणानि, मूत्राघातलक्षणानि, अथाश्मरीलक्षणानि, प्रमेहलक्षणानि, पिटकालक्षणानि, मसूरीकापिटकालक्षणानि, मेदलक्षणमाह, गण्डमालालक्षणानि, श्लीपदलक्षणानि, विद्रधिलक्षणानि, उपदंशलक्षणानि, शूकदोषलक्षणानि, कुष्ठलक्षणानि, शीतपित्तोदर्दकोठलक्षणानि, कोठलक्षणम्, अम्लपित्तलक्षणानि, गलास्यरोगलक्षणानि, कर्णरोगलक्षणानि, नासारोगलक्षणानि, नेत्ररोगलक्षणानि, शीर्षरोगलक्षणानि, स्त्रीरोगलक्षणानि, योनिकन्दलक्षणानि, योनिदोषलक्षणानि, प्रसूतिकारोगलक्षणानि, बालरोगलक्षणानि, विषलक्षणानि, रोगिणो मूत्रलक्षणानि अन्ते कतिपय श्लोका: उपसंहाररूपेणाऽपि दृश्यन्ते।
अस्मिन् ग्रन्थे आयुर्वेदोक्तानां प्राय: सर्वेषां रोगाणां निदानपूर्वरूप-रूपोपशम-संप्रात्युपद्रव-साध्यासाध्यविचारप्रभृतयो विषया: संक्षेपणातिस्पष्टतयोपवर्णिता:। अयं च मन्दबुद्धीनामल्पेनापि परिश्रमेण रोगसमूह-ज्ञानसंपादनविधावद्वितीयो वरीवर्त्ति। भिषजामतीवोपयुक्तोऽयं ग्रन्थ:,यदिमं भिषज: सर्वदा उपस्थिमेव रक्षन्ति चेत् अस्य निर्मलज्ञानेन रोगसमूहान् विनिर्णयन्ति।

## संदर्भ सूची


1. सा० द०- १.२
2. का० प्र०- १.२
3. का० मी०- ३.१४
4. यजु०- ४०.८
5. अथर्व- १०.८.३२
6. अष्टा०- ५.१.१२३
7. का० प्र०- १.४
8. का० प्रा०- १.२
9. का०दर्श- २.९
10. का०दर्श - १.१०
11. ध्व०- १.१
12. वक्र०- १.७
13. औ०वि०च०- ४-५
14. का०मी०- ५
15. श्रृ० प्र०- ११.३४.३
16. सु० ति०- ३.२-३-४
17. सु०सूत्र- १.१४
18. क० सू- १.२४
19. क० सू०- १.२५
20. भिषक्चक्र०- १.५
21. भिषक्चक्र०- १.७
22. भिषक्चक्र०- १.८
23ण भिषक्चक्र०- १.१